# Nachiketakrita Yama Stutih

# નચિકેતકૃતા યમસ્તુતિઃ

## Document Information

Text title : Nachiketakrita Yama Stutih

File name : nachiketakRRitAyamastutiH.itx

Category : deities_misc, stuti, varAhapurANa

Location : doc_deities_misc

Proofread by : PSA Easwaran

Description/comments : varAhapurANa | adhyAya 198/9-20||

Latest update : September 4, 2024

Send corrections to : sanskrit at cheerful dot c om

This text is prepared by volunteers and is to be used for personal study and research. The file is not to be copied or reposted without permission, for promotion of any website or individuals or for commercial purpose.

**Please help to maintain respect for volunteer spirit.**

Please note that proofreading is done using Devanagari version and other language/scripts are generated using **sanscript**.

September 4, 2024

*sanskritdocuments.org*

# નચિકેતકૃતા યમસ્તુતિઃ

ઋષિપુત્ર (નચિકેત) ઉવાચ ॥

ત્વં ધાતા ચ વિધાતા ચ શ્રાદ્ધે ચૈવ હિ દૃશ્યસે ॥

પિતૃણાં પરમો દેવશ્ચતુષ્પાદ નમોઽસ્તુ તે ॥ ૯॥

કાલજ્ઞશ્ચ કૃતજ્ઞશ્ચ સત્યવાદી દૃઢવ્રતઃ ॥

પ્રેતનાથ મહાભાગ ધર્મરાજ નમોઽસ્તુ તે ॥ ૧૦॥

કર્મ કારયિતા ચૈવ ભૂતભવ્યભવત્પ્રભો ॥

પાવકો મોહનશ્ચૈવ સઙ્ક્ષેપો વિસ્તરસ્તથા ॥ ૧૧॥

દણ્ડપાણે વિરૂપાક્ષ પાશહસ્ત નમોઽસ્તુ તે ॥

આદિત્યસદૃશાકાર સર્વજીવહર પ્રભો ॥ ૧૨॥

કૃષ્ણવર્ણ દુરાધર્ષ તૈલરૂપ નમોઽસ્તુ તે ॥

માર્તણ્ડસદૃશ શ્રીમન્માર્તણ્ડસદૃશદ્યુતિઃ ॥ ૧૩॥

હવ્યકવ્યવહસ્ત્વં હિ પ્રભવિષ્ણો નમોઽસ્તુ તે ॥

પાપહન્તા વ્રતી શ્રાદ્ધી નિત્યયુક્તો મહાતપાઃ ॥ ૧૪॥

એકદૃગ્બહુદૃગ્ભૂત્વા કાલમૃત્યો નમોઽસ્તુ તે ॥

ક્વચિદ્દણ્ડી ક્વચિન્મુણ્ડી ક્વચિત્કાલો દુરાસદઃ ॥ ૧૫॥

ક્વચિદ્બાલઃ ક્વચિદ્વૃદ્ધઃ ક્વચિદ્રૌદ્રો નમોઽસ્તુ તે ॥

ત્વયા વિરાજિતો લોકઃ શાસિતો ધર્મહેતુના ॥ ૧૬॥

પ્રત્યક્ષ્યં દૃશ્યતે દેવ ત્વાં વિના ન ચ સિધ્યતિ ॥

દેવાનાં પરમો દેવસ્તપસાં પરમં તપઃ ॥ ૧૭॥

જપાનાં પરમં જપ્યં ત્વત્તશ્ચાન્યો ન દૃશ્યતે ॥

ઋષયો વા તથા ક્રુદ્ધા હતબન્ધુસુહૃજ્જનાઃ ॥ ૧૮॥

પતિવ્રતાસ્તુ યા નાર્યો દુઃખિતાસ્તપસિ સ્થિતાઃ ॥

ન ત્વં શક્ત ઇહ સ્થાનાત્પાતનાય કદાચન ॥ ૧૯॥

તસ્માત્ત્વં સર્વદેવેષુ ચૈકો ધર્મભૃતાં વરઃ ॥

કૃતજ્ઞઃ સત્યવાદી ચ સર્વભૂતહિતે રતઃ ॥ ૨૦॥

ઇતિ વરાહપુરાણે અષ્ટનવત્યધિકશતતમાધ્યાન્તર્ગતા નચિકેતકૃતા
યમસ્તુતિઃ સમાપ્તા ।

વરાહપુરાણ । અધ્યાય ૧૯૮/૯-૨૦॥

varAhapurANa . adhyAya 198/9-20..

Proofread by PSA Easwaran

*Nachiketakrita Yama Stutih*

pdf was typeset on September 4, 2024

Please send corrections to *sanskrit@cheerful.com*